द्वितीयः पाठः

# नास्ति त्यागसमं सुखम्

**राजीवः** – सोम! पश्य एतत् चित्रम्।

**सोमः** – अतीव सुन्दरम्।

**शोभा** – एतत् तु अजन्ता-गुहानां चित्रं प्रतीयते।

**राजीवः** – आम्! महाराष्ट्रप्रदेशे स्थिताः एताः अजन्ता-गुहाः एव।

**सौरभः** – अहो! दृष्टम्। अत्र तु अनेकानि जातक-चित्राणि उट्टङ्कितानि सन्ति।

**देविका** – जातकं किं भवति?

**राजीवः** – अहं न जाने! आचार्यं प्रक्ष्यामः।

(तत्र गत्वा)

**छात्राः** – गुरुवर! जातकं किं भवति?

**आचार्यः** – जातकम् अर्थात् जन्म। 'जातकमाला' इति नाम्नि पुस्तके भगवतः बुद्धस्य पूर्वजन्मनः विविधाः कथाः सन्ति। एतासु परहिताय सर्वस्वं त्यक्तव्यम् इत्येव शिक्षितम्। एतादृशीम् एकां कथां कथयामि।

**छात्राः** – एवम्! वयम् एतादृशीं कथां श्रोतुम् उत्सुकाः।

**आचार्यः** – श्रूयतां तावत्। बौद्धाचार्यस्य आर्यशूरस्य जातकमालायाः शिविजातक-आधारिता एषा कथा।

# द्वितीयः पाठः नास्ति त्यागसमं सुखम्

अथ एकदा भगवान् बोधिसत्त्वः बहुजन्मार्जितपुण्यफलैः शिवीनां राजा अभवत्। स बाल्यात् एव वृद्धोपसेवी, विनयशीलः, शास्त्रपारङ्गतः च आसीत्। जनकल्याणकर्मसु रतः असौ पुत्रवत् प्रजाः पालयति स्म। कारुण्य-औदार्यादिसद्गुणोपेतः स नगरस्य समन्ततः धन-धान्यसमृद्धाः दानशालाः अकारयत्। तत्र अर्थिनां समूहः अन्न-पान-वसन-रजत-सुवर्णादिकानि अभीष्टानि वस्तूनि प्राप्य सन्तुष्टः अभवत्। राज्ञः दानशीलताम् आकर्ण्य देशान्तरेभ्योऽपि जनाः तं देशम् आयान्ति स्म।



अथ कदाचित् दानशालासु विचरन् स राजा बहुधनलाभेन सन्तुष्टानाम् अर्थिनां विरलसंख्यां विलोक्य अचिन्तयत् 'मम अर्थिनः तु धनलाभमात्रेण सन्तोषं भजन्ते। नूनं ते दानवीराः सौभाग्यशालिनः यान् याचकाः शरीरस्य अङ्गानि अपि याचन्ते।' एवं राज्ञः स्वेषु गात्रेष्वपि निरासक्तिं विज्ञाय सकलं ब्रह्माण्डं व्याकुलं सञ्जातम्।

राज्ञि एवं विचारयति सति तस्य दानशीलतां परीक्षितुं देवाधिपतिः शक्रः नेत्रहीनयाचकस्य रूपं धारयित्वा तत्पुरतः अवदत्-हे राजन्! भवतः दानवीरताम् आकर्ण्य आशान्वितः भवत्समीपम् आगतोऽस्मि। देव! रवि-शशि-तारा-मण्डलभूषितं जगत् एतत् कथमिव पश्येयं चक्षुर्हीनः।

राजा उवाच- भगवन्! भवन्मनोरथं पूरयित्वा आत्मानम् अनुगृहीतं कर्तुम् इच्छामि। आदिश्यतां किं करवाणि? विप्रः अकथयत् - यदि भवान् प्रीतः, तदा त्वत्तः एकस्य चक्षुषः दानम् इच्छामि येन मम लोकयात्रा निर्बाधा भवेत्। तत् श्रुत्वा राजा अचिन्तयत्- "लोके चक्षुर्दानं दुष्करमेव। नूनम् ईदृशं दानम् इच्छन् अयं याचकः केनापि प्रेरितः स्यात्! अथवा भवतु नाम किं बहु चिन्तनेन?" इति विचार्य राजा अभाषत-"भो मित्र! किमेकेन चक्षुषा, अहं भवते चक्षुर्द्वयमेव प्रयच्छामि इति।"

राज्ञः नेत्रदानार्थं निश्चयं ज्ञात्वा अमात्याः विषण्णाः भूत्वा अवदन्-महाराज! अलम् एतावता दुस्साहसेन, प्रभूतं धनमेव दीयताम्।

अथ स राजा तान् अवदत्-

**दास्यामीति प्रतिज्ञाय योऽन्यथा कुरुते मनः।**
**कार्पण्यानिश्चितमतेः कः स्यात् पापतरस्ततः॥**

नाहं स्वर्गं न मोक्षं वा कामये किन्तु आर्त्तानां परित्राणाय एव मे निश्चयः।

अस्य याच्ञा वृथा मा अस्तु इत्युक्त्वा स राजा वैद्योक्तविधिना नीलोत्पलम् इव एकं चक्षुः शनैः अक्षतम् उत्पाट्य प्रीत्या याचकाय समर्पितवान्। सः अपि तत् नेत्रं यथास्थानम् अस्थापयत्। ततो महीपालः द्वितीयं नेत्रमपि शनैः निष्कास्य तस्मै

अयच्छत्। अथ विस्मितः शक्रः अचिन्तयत्–

**अहो धृतिः! अहो सत्त्वम् !**

**अहो सत्त्वहितैषिता!**

नायं चिरं परिक्लेशम् अनुभवितुम् अर्हति। अतः प्रयतिष्ये चक्षुषोऽस्य पुनः प्रत्यारोपणाय इति।

कतिपयैः दिनैः व्रणविरोपणे जाते एकदा राजा सरोवरस्य समीपे विहरति स्म। तदा तस्य पुरतः पुनः देवराजः शक्रः उपस्थितः भूत्वा तस्य त्यागवृत्तिं प्रशंसन् अवदत्–

**शक्रोऽहमस्मि देवेन्द्रस्त्वत्समीपमुपागतः।**

**वरं वृणीष्व राजर्षे! यदिच्छसि तदुच्यताम्।**

एवम् उक्तेन राज्ञा नेत्रार्थं प्रार्थिते सति शक्रस्य प्रभावेण आत्मनः सत्यपुण्यबलेन च तस्य प्रथमम् एकं चक्षुः प्रतिष्ठितम् अभवत् ततः द्वितीयमपि। भूयः प्रीतः शक्रः वरम् अयच्छत्–

शतयोजनपर्यन्तं शैलानां पारं च द्रष्टुं समर्थः भव इति।

इति उक्त्वा शक्रः तत्रैव अन्तर्हितः अभवत्।

अतः सत्यमेव उक्तम्–

**धनस्य निःसारलघोः स सारो यद् दीयते लोकहितोन्मुखेन।**

**निधानतां याति हि दीयमानम् अदीयमानं निधनैकनिष्ठम्॥**



# शब्दार्थाः

| | | | |
|---|---|---|---|
| **अभीष्टानि** (वि०) (नपुं०प्र०ब०व०) (अभि+इष्+क्त) | इच्छितानि | इच्छित | desired. |
| **आशान्वितः** (वि०) (पु०प्र०ए०व०) [आशया अन्वितः, तृ०त०पु०] | आशायुक्तः | आशावान् | full of hope. |
| **कारुण्य-औदार्यादिसद्गुणोपेतः** (वि०)(पु०प्र०ए०व०) [कारुण्यम् औदार्यम् च आदौ येषाम् तैः सद्गुणैः उपेतः, तृ०त०पु०] | करुणा-उदारतादि-सद्गुणैः युक्तः | करुणा, उदारता आदि सद्गुणों से युक्त | endowed with the qualities of compassion and generosity etc. |
| **कार्पण्यम्** (सं०) (नपुं०प्र०ए०व०) [कृपण+घञ्, कृपणस्य भावः] | हृदयस्य दुर्बलता | हृदय की दुर्बलता | Weakness of mind. |
| **चक्षुः** (सं०-चक्षुष्) (नपुं०प्र०ए०व०) | नेत्रम् | आँख | eye. |
| **जनकल्याणकर्मसु** (सं०) (नपुं० स०ब०) [जनानां कल्याणम्, जनकल्याणस्य कर्मसु, ष०त०पु०] | लोकहितस्य कार्येषु | मानवहित के कर्मों में | in the deeds beneficial for humanity. |
| **निधनैकनिष्ठम्** (वि०) (पु०प्र०ए०व०) [निधनम् एका निष्ठा यस्य तत्, ब०व्री०] | विनाशः एव भाग्यं यस्य तत् (धनम्) | विनाश ही जिसकी नियति है (ऐसा धन) | (wealth) of which destruction is the ultimate destiny. |
| **निधानताम्** (सं०) (स्त्री०द्वि०ए०व०) [नि+धा+ल्युट्+तल्] | सम्पन्नताम् | सम्पन्नता, समृद्धि | stored, treasure. |
| **नीलोत्पलम्** (सं०) (नपुं०प्र०ए०व०) [नीलं च तत् उत्पलम्, कर्मधा०] | नीलं कमलम् | नीला कमल | blue lotus. |
| **निरासक्तिम्** (सं०) (स्त्री०द्वि०ए०व०) [निर्+आ+सञ्ज्+क्तिन्] | वैराग्यम् | वैराग्य | detachment |
| **प्रीतः** (वि०) (पु०प्र०ए०व०)[प्री+क्त] | प्रहृष्टः | प्रसन्न | pleased. |
| **बहुजन्मार्जितपुण्यफलैः** (सं०) (नपुं०ब०व०) [बहूनि च तानि जन्मानि कर्मधा०, बहुजन्मसु अर्जितम्, स०त०पु० बहुजन्मार्जितं च तत् पुण्यम्, कर्मधा० बहुजन्मार्जितपुण्यस्य फलैः, ष०त०पु०] | अनेक-जन्म-सञ्चितैः फलैः | अनेक (पूर्व) जन्मों में अर्जित पुण्यों से संचित फलों के द्वारा | as a result of virtuous deeds done in many (previous) births. |

| | | | |
|---|---|---|---|
| **बोधिसत्त्वः** (सं०) (पु०प्र०ए०व०) [बोधि इति ज्ञानम्, सत्त्वम् इति प्राणी, ज्ञानाय यः प्रयतते सः बोधिसत्वः] | प्रबुद्धः | ज्ञानप्राप्ति के लिए प्रयत्नशील प्राणी | Bodhisattva is who tries to obtain knowledge. |
| **ब्रह्माण्डम्** (सं०) (नपुं०प्र०ए०व०) [ब्रह्मणः अण्डम्, ष०त० पु०] | सम्पूर्णा सृष्टिः | समस्त सृष्टि | whole universe. |
| **याच्ञा** (सं०) (स्त्री०प्र०ए०व०) [याच्+नङ्+टाप्] | याचना | प्रार्थना | request. |
| **लोकयात्रा** (सं०) (स्त्री०प्र०ए०व०) [लोकस्य यात्रा, ष०त०पु०] | सांसारिक-जीवनयात्रा | सांसारिक जीवन यात्रा | journey of the worldly life.. |
| **विचारणाम्** (सं०) (स्त्री०द्वि०ए०व०) [वि+चर्+णिच्+ल्युट्+टाप्] | धारणाम् | विचार | thought. |
| **विरलसङ्ख्याम्** (सं०) (स्त्री०द्वि०ए०व०) [विरला च सा सङ्ख्या ताम्, कर्मधा०] | न्यूनसङ्ख्याम् | कम संख्या | areft; of lesser number. |
| **विषण्णाः** (वि०) (पु०प्र०ब०व०) [वि+सद्+क्त] | हताशाः, खिन्नाः | दुःखी, व्यथित | disturbed, unhappy. |
| **विस्मिताः** (वि०) (पु०प्र०ब०व०) [वि+स्मि+क्त] | चकिताः | आश्चर्य में पड़े हुए | astonished, surprised. |
| **वैद्योक्तविधिना** (सं०)(पु०तृ०ए०व०) [वैद्येन उक्तः तृ०त०पु०; वैद्योक्तः च असौ विधिः तेन, कर्मधा०] | चिकित्सकेन निर्दिष्टमार्गेण | वैद्य द्वारा बताई गयी विधि से | by the method told by the physician. |
| **व्रणविरोपणे** (सं०) (नपुं०स०ए०व०) [व्रणस्य विरोपणे, ष०त०पु०] | घाते स्वस्थे जाते | घाव के भरने पर | on healing of the wound. |
| **शाश्वतः** (वि०) (पु०प्र०ए०व०) | नित्यः, सनातनः | नित्य, सदा रहने वाला | Omnipresent. |
| **शास्त्रपारङ्गतः** (वि०)(पु०प्र०ए०व०) [शास्त्राणाम् शास्त्रेषु पारङ्गतः ष०स०त०पु०] | शास्त्रेषु निष्णातः | शास्त्रों में दक्ष | expert in shastras. |
| **सत्त्वहितैषिता** (सं०)(स्त्री०प्र०ए०व०) [सत्त्वानां हितैषिता, ष०त०पु०] | प्राणिनां कल्याणस्य इच्छा | जीवों के कल्याण की इच्छा करना | desire for the welfare of the living beings. |
| **समन्ततः** (अव्य०) | परितः | चारों ओर | all the sides. |

# इदमपि जानन्तु

## सन्धियुक्तपदानि

| | | | | | |
|---|---|---|---|---|---|
| औदार्यादिसद्गुणोपेतः | = | औदार्य+आदिसत्+गुण+उपेतः | देशान्तरेभ्योऽपि | = | देशान्तरेभ्यः+अपि |
| गात्रेष्वपि | = | गात्रेषु+अपि | चक्षुर्हीनः | = | चक्षुः+हीनः |
| चक्षुर्दानम् | = | चक्षुः+दानम् | योऽन्यथा | = | यः+अन्यथा |
| पापतरस्ततः | = | पापतरः+ततः | वृद्धोपसेवी | = | वृद्ध+उपसेवी |
| वैद्योक्तविधिना | = | वैद्य+उक्तविधिना | चक्षुषोऽस्य | = | चक्षुषः+अस्य |
| ततो महीपालः | = | ततः+महीपालः | प्रत्यारोपणाय | = | प्रति+आरोपणाय |
| शक्रोऽहम् | = | शक्रः+अहम् | नेत्रार्थम् | = | नेत्र+अर्थम् |
| तदुच्यताम् | = | तत्+उच्यताम् | | | |

## सन्धिकार्यम्

| | | | | | |
|---|---|---|---|---|---|
| रतः+असौ | = | रतोऽसौ | सन्तुष्टः+अभवत् | = | सन्तुष्टोऽभवत् |
| जनाः+तम् | = | जनास्तम् | सः+राजा | = | स राजा |
| दानवीराः+सौभाग्यशालिनः | = | दानवीरास्सौभाग्यशालिनः | ततः+महीपालः | = | ततो महीपालः |
| चक्षुः+शनैः+अक्षतम् | = | चक्षुश्शनैरक्षतम् | आगतः+अस्मि | = | आगतोऽस्मि |
| भवत्+मनोरथः | = | भवन्मनोरथः | लोकहित+उन्मुखेन | = | लोकहितोन्मुखेन |
| दास्यामि+इति | = | दास्यामीति | सन्तुष्टः+अभवत् | = | सन्तुष्टोऽभवत् |
| निधन+एकनिष्ठम् | = | निधनैकनिष्ठम् | | | |

## संयोगः

| | | | | | |
|---|---|---|---|---|---|
| द्वयमेव | = | द्वयम्+एव | प्रथममेकम् | = | प्रथमम्+एकम् |
| द्वितीयमपि | = | द्वितीयम्+अपि | सत्यमेव | = | सत्यम्+एव |

# अभ्यासः

1. **एकपदेन उत्तरत –**

(क) भगवान् बोधिसत्त्वः कथं शिवीनां राजा अभवत्? ..........................................

(ख) सकलं ब्रह्माण्डं कीदृशं सञ्जतम्? ..........................................

(ग) के सौभाग्यशालिनः यान् याचकाः शरीरस्य अङ्गानि याचन्ते? ..........................................

(घ) राजा वैद्योक्तविधिना नीलोत्पलम् इव किम् अक्षतम् उदपाटयत्? ....................................

(ङ) राजा कस्य समीपे विहरति स्म? ....................................

(च) राज्ञः काम् आकर्ण्य देशान्तरेभ्योऽपि जनाः आयान्ति स्म? ....................................

(छ) भूयः प्रीतः शक्रः किम् अयच्छत्? ....................................

## 2. पूर्णवाक्येन उत्तरत –

(क) बोधिसत्त्वः शैशवात् एव कीदृशः आसीत्?

....................................................................................................

(ख) शिवेः राज्ये याचकाः किं लब्ध्वा सन्तुष्टाः अभवन्?

....................................................................................................

(ग) नेत्रहीनयाचकस्य रूपं धृत्वा शक्रः बोधिसत्त्वं किम् अवदत्?

....................................................................................................

(घ) सकलं ब्रह्माण्डं किं ज्ञात्वा व्याकुलं जातम्?

....................................................................................................

(ङ) राजा प्रीत्या याचकाय किं समर्पितवान्?

....................................................................................................

(च) शक्रः किं वरम् अयच्छत्?

....................................................................................................

## 3. अधोलिखित-कथनेषु स्थूलपदानि आधृत्य उदाहरणानुसारं प्रश्ननिर्माणं क्रियताम्–

**यथा–** राजा **नगरस्य** समन्ततः दानशालाः अकारयत्।

राजा **कस्य** समन्ततः दानशालाः अकारयत्?

(क) अभीष्टवस्तूनि प्राप्य **याचकाः** सन्तुष्टाः आसन्। ....................................

(ख) **दानशालासु** विचरन् राजा अचिन्तयत्। ....................................

(ग) राजा पुत्रवत् **प्रजाः** पालयति स्म। ....................................

(घ) स राजा **तान्** अकथयत्। ....................................

(ङ) राजा **याचकेभ्यः** दानं ददाति स्म। ....................................

**4. अधोलिखित-प्रश्नान् यथानिर्देशम् उत्तरत –**

(क) 'शक्रः तत्रैव अन्तर्हितः अभवत्।' अस्मिन् वाक्ये विशेषणपदं किम्?

(ख) 'सत्यबलेन तस्य चक्षुः प्रतिष्ठितम् अभवत्।' अस्मिन् वाक्ये कर्तृपदम् किम्?

(ग) 'जनाः तं देशम् आयान्ति स्म।' अस्मिन् वाक्ये विशेष्यपदं किम्?

(घ) 'अर्थिनः तु धनलाभमात्रेण सन्तोषं भजन्ते।' अत्र 'परितोषः' अस्मिन् अर्थे किं पदं प्रयुक्तम्?

(ङ) 'शतयोजनपर्यन्तं शैलानां पारं च द्रष्टुं समर्थः भव।' अत्र 'असमर्थः' अस्य विलोमपदं किं प्रयुक्तम्?

(च) 'बोधिसत्त्वः शिवीनां राजा अभवत्।' अत्र क्रियापदं किम्?

**5. समुचितम् अर्थं मेलयत –**

| | | |
|---|---|---|
| (क) शैलानाम् | .................................... | नेत्रम् |
| (ख) शक्रः | .................................... | स्वस्य |
| (ग) आत्मनः | .................................... | पर्वतानाम् |
| (घ) चक्षुः | .................................... | इन्द्रः |
| (ङ) उत्पाट्य | .................................... | भूपतिः |
| (ङ) महीपालः | .................................... | निष्कास्य |

**6. अधोलिखितानि वाक्यानि कथाक्रमानुसारं लिखत –**

(क) स बाल्यात् एव वृद्धोपसेवी, विनयशीलः शास्त्रपारङ्गतः च आसीत्।

(ख) राज्ञः दानशीलताम् आकर्ण्य देशान्तरेभ्योऽपि जनाः तं देशम् आयान्ति स्म।

(ग) कारुण्य-औदार्यादिसद्गुणोपेतः स नगरस्य समन्ततः धन-धान्यसमृद्धाः दानशालाः अकारयत्।

(घ) मम अर्थिनः तु धनलाभमात्रेण सन्तोषं भजन्ते।

(ङ) अथ कदाचित् दानशालासु विचरन् स राजा बहुधनलाभेन सन्तुष्टानाम् अर्थिनां विरलसङ्ख्यां विलोक्य अचिन्तयत्

(च) जनकल्याणकर्मसु रतः असौ पुत्रवत् प्रजाः पालयति स्म।

(छ) तत्र अर्थिनां समूहः अन्न-पान-वसन-रजत-सुवर्णादिकानि अभीष्टानि वस्तूनि प्राप्य सन्तुष्टः अभवत्।

(ज) अथ एकदा भगवान् बोधिसत्त्वः बहुजन्मार्जितपुण्यफलैः शिवीनां राजा अभवत्।

**7. प्रसङ्गानुसारम् अर्थं चिनुत –**

(क) राज्ञः दानशीलताम् <u>आकर्ण्य</u> जनाः तं देशम् आयान्ति स्म।

(i) श्रुत्वा (ii) मत्वा (iii) प्राप्य

(ख) राज्ञः नेत्रदानार्थं निश्चयं ज्ञात्वा अमात्याः <u>विषण्णाः</u> भूत्वा अवदन्।

(i) विमुखाः (ii) खिन्नाः (iii) प्रसन्नाः

(ग) यदि भवान् प्रीतः, तदा त्वत्तः एकस्य <u>चक्षुषः</u> दानम् इच्छामि।

(i) श्रोत्रस्य (ii) गात्रस्य (iii) नेत्रस्य

(घ) एकदा राजा <u>सरोवरस्य</u> समीपे विहरति।

(i) तडागस्य (ii) नगरस्य (iii) नद्याः

(ङ) न <u>अयं</u> चिरं परिक्लेशम् अनुभवितुम् अर्हति।

(i) एषः (ii) सः (iii) तत्

(च) <u>सकलं</u> ब्रह्माण्डं व्याकुलं सञ्जातम्।

(i) सम्पूर्णम् (ii) परिपूर्णम् (iii) गभीरम्

**8. अधः केचन विग्रहाः दत्ताः। कोष्ठकात् चित्वा क्रमानुसारं समस्तपदानि लिखत–**

| समास–विग्रहाः | समस्तपदानि |
|---|---|
| (क) निर्गता बाधा यस्याः सा | .................................... |
| (ख) धान्येन समृद्धाः | .................................... |
| (ग) विनयः शीलं यस्य सः | .................................... |
| (घ) वृद्धान् उपसेवितुं शीलं यस्य सः | .................................... |
| (ङ) शक्रस्य प्रभावेण | .................................... |
| (च) शास्त्रेषु पारङ्गतः यः सः | .................................... |

वृद्धोपसेवी
विनयशीलः
धान्यसमृद्धाः
निर्बाधा
शक्रप्रभावेण
शास्त्रपारङ्गतः

**9. अधोलिखितानां सूक्तीनाम् अधः सम्बद्धाः पाठान्तर्गतपङ्क्तयः लिख्यन्ताम् –**

(क) न त्वहं कामये राज्यं न स्वर्गं नापुनर्भवम्।

....................................................................................................

(ख) हुतं च दत्तं च सदैव तिष्ठति।

....................................................................................................

(ग) क्षयम् आयाति सञ्चयात्।

....................................................................................................

**10. अधोलिखितानां वाक्यानां सम्मुखे दत्तेषु भावेषु उचित-भावस्य सम्मेलनं क्रियताम् -**

| वाक्यानि | भावः |
|---|---|
| (क) असौ पुत्रवत् प्रजाः पालयति स्म। | दानवीरता |
| (ख) सः नगरस्य समन्ततः दानशालाः अकारयत्। | दुःखम् |
| (ग) ममार्थिनस्तु धनलाभमात्रेण सन्तोषं लभन्ते। | स्नेहः |
| (घ) राज्ञः नेत्रदाननिश्चयं ज्ञात्वा अमात्याः विषण्णाः जाताः। | उदारता |
| (ङ) अहं भवते चक्षुर्द्वयमेव प्रयच्छामि। | निराशा |

## अन्वयः

1. दास्यामि इति प्रतिज्ञाय यः मनः अन्यथा कुरुते कार्पण्य-अनिश्चितमतेः ततः पापतरः कः स्यात्?
2. राजर्षे! अहम् देवेन्द्रः शक्रः त्वत् समीपम् उपागतः अस्मि। वरम् वृणीष्व यत् इच्छसि तत् उच्यताम्।
3. निःसारलघोः धनस्य सः सारः यत् लोकहित-उन्मुखेन दीयते। दीयमानम् (धनम्) निधानताम् हि याति। अदीयमानम् (धनम्) निधन-एकनिष्ठम् (भवति)।

## योग्यताविस्तारः

**(न परीक्षाकृते)**

**(क) ग्रन्थ-परिचयः**

इयं कथा श्रीमदार्यशूरेण विरचितायाः जातकमालायाः सङ्गृहीता अस्ति। अस्मिन् ग्रन्थे भगवतः बुद्धस्य पूर्वजन्मनां कथाः सन्ति।

जातक (जात + कन्) अर्थात् उत्पन्नः।

**बोधिसत्त्वः**

बोधि-ज्ञानम्। सत्त्वम्-मनः। ज्ञानाय यः प्रयतते सः बोधिसत्त्वः।

**दानमहिमा**

(क) दानं भोगो नाशस्तिस्रो गतयो भवन्ति वित्तस्य।
यो न ददाति न भुङ्क्ते तस्य तृतीया गतिर्भवति॥

(ख) गौरवं प्राप्यते दानान्न तु वित्तस्य सञ्चयात्।
स्थितिरुच्चैः पयोदानां पयोधीनामधः स्थितिः॥

(ग) दातव्यमिति यद्दानं दीयतेऽनुपकारिणे।
देशे काले च पात्रे च तद्दानं सात्त्विकं विदुः॥

## प्रहेलिका

**कृष्णमुखी न मार्जारी द्विजिह्वा न च सर्पिणी।**
**पञ्चभर्त्री न पाञ्चाली यो जानाति स पण्डितः॥**

मुखभागः कृष्णवर्णः वर्तते किन्तु कृष्णवर्णा मार्जारी नास्ति, द्वे जिह्वे भवतः किन्तु सर्पिणी नास्ति, पञ्च पतयः सन्ति किन्तु पाञ्चाली (द्रौपदी) नास्ति। तर्हि किम् अस्ति ? यः जानाति सः पण्डित एव।

## एहि हसाम

एकदा चत्वारः जनाः कुत्रचित् एकं लघु-आयोजनं (पार्टी) कर्तुं गतवन्तः। ते आपणतः चतुष्टयं त्रिकोणपिष्टकं स्वीकृतवन्तः। यदा ते आनन्दायोजनं कर्तुम् उद्युक्ताः आसन् तेषां स्मरणम् आगतं यत् ते इदानीं पर्यन्तं शीतपेयं (पेप्सी इत्यादिकं) न स्वीकृतवन्तः। ते विचारितवन्तः यत् तेषु कश्चित् पुनः विपणिं गत्वा शीतलपेयं स्वीकुर्यात्। तेषु एकः गन्तुं स्वीकृतिं दत्तवान्। किन्तु यावत् अहं न आगच्छामि तावत् कोऽपि एकमपि पिष्टकं न खादेत् इति सः अवदत्। सर्वे अङ्गीकृतवन्तः। सः गतः। एकहोरायावत् कालः गतः, सः न आगतवान्। द्वितीय-होरा अपि गतः, पुनरपि सः न आगतवान्। सर्वे विचारितवन्तः यत् सम्भवतः सः विस्मृतवान् शीतलपेयम् आनेतुम्, अतः इदानीं वयं स्वं पिष्टकं भुञ्जेम। अतः यदा ते पिष्टकं भोक्तुं तत् हस्ते स्वीकृतवन्तः तदैव चतुर्थः वृक्षस्य पृष्ठतः बहिः आगतः उक्तवान् च यदि भवन्तः पिष्टकं खादिष्यन्ति तर्हि अहं शीतलपेयम् आनेतुं न गच्छामि।